# શ્રી ત્રિપુરા સ્તવરાજ
## ધ્યાનમ્

1) શ્રી નાથાદિ ગુઢ ત્રયં ગણપતિં પીઠત્રયં ભૈરવં ।
સિદ્ધોધં બટુકત્રયં પદયુગં દૂતીક્રમં મંડલમ્ ।
વીરાન્ધ્વષ્ટ ચતુષ્કશષ્ટિનવકં વીરાવલી પંચકમ્ ।
શ્રી મન્માલિની મન્ત્રરાજ સહિતં વન્દે ગુરોમંડલમ્ ॥

2) સેવે સિન્દુર સંદોહ, સુન્દર સ્વાંગ ભાસુરામ્ ।
કરૂણાપુર પિયુષ, કટાક્ષાં કુલનાયિકામ્ ॥

3) દ્વિનેત્રા દ્વિભૂજં શાન્તં ગુરૂ પદ્માસનસ્થિતમ્ ।
યોગપીઠે સમાસીનં નમામિ શિરસિ સ્થિતમ્ ॥

4) નમામિ સદ્ગુરૂં શાન્તં પ્રત્યક્ષ શિવ રૂપિણિમ્ ।
શીરસા યોગ પીઠસ્થં મુક્તિ કામાર્થ સિધ્ધ્યે ॥

5) યા નિત્યા પરમા શક્તિ જગત્ ચૈતન્ય રૂપિણી ।
તાં નમામી મહાદેવીં પંચમી માતૃરૂપિણિમ્ ॥

6) યસ્યાઃ સર્વ સમુત્પન્નં યસ્યા મદ્યાપિ તિષ્ઠતિ ।
લય મેષ્યતિ યસ્યાં તાં પંચમી પ્રણમામ્યહમ્ ॥

7) શ્રી મત્કલ્પતરોર્મૂલે ભવાન્યા રત્ન મન્દિરે ।
રત્નસિંહાસને દેવ્યાઃ શ્રી ચક્રં પ્રણમામ્યહમ્ ॥

8) ભૂગૃહં ગુણરેખાઢ્યં વેદદ્વારોપ શોભિતમ્ ।
ત્રિવૃતં ષોડશદલમ્ તથાષ્ટ દળ કર્ણિકમ્ ॥

9) મનુકોણં દ્વિદિકોણં વસુકોણં ત્રિકોણકમ્ ।
મધ્યે બિન્દુ મહાચક્રં નિત્યં શ્રી ત્રિપુરામયમ્ ॥

10) બ્રહમાંડા ધાર શક્તિશ્ચ કલાસ્મર પુરન્દરાઃ ।
એતાઃ સંયોજ્ય પુરત ઈશ્વરી યોજયેચ્છિવે ॥

11) ચન્દ્ર બીજં બિન્દુ સંસ્થં શિવબીજં નિયોજયેત્ ।
માદનં શક્રબીજસ્થં યોજયેત ભૂવનેશ્વરીમ્ ॥
12) શિવબીજં માદનસ્થં શક્રષષ્ટિ સમન્વિતમ્ ।
સપ્તમં તચ્ચ શક્રરસ્થં માયાબીજં સમુદધરેત્ ॥
13) તુગાક્ષરં શિવાદિસ્થં મરૂદિન્દ્ર સમન્વિતમ્ ।
ધરન્ધર સુતાબીજમ્ એકત્રાપિ નિયોજયેત્ ॥
14) બગલા તુરીય બીજાધઃષોડશં ચ નિયોજયેત્ ।
વાકસ્થં તુરીયકં બીજં શાક્ર બીજં નિયોજયેત્ ॥
15) પિનાકેશં ચન્દ્રસંસ્થાં આકાશં રસસંસ્થિતમ્ ।
ચતુર્થ સ્વર સંયુક્તં નાદબિન્દુ સમન્વિતમ્ ॥
16) સર્વ મેકત્ર સંયોજય પંચ પંચાક્ષરી ભવેત્ ।
પંચ કૂટાત્મિકા વિધ્યા સર્વ તંત્રેષુ ગોપિતા ॥
17) વિદ્યા ચૂડામણી દેવી પ્રોક્તા સર્વોત્તમોત્તમા ।
તવ સ્નેહા મયાખ્યાતા નાખ્યે યા યશ કસ્યાચિત્ ॥
18) ઈન્દ્રોમાં રક્ષયેત્પ્રાચ્યામ્ આગ્નેયામ અગ્નિદેવતા ।
યામ્યે યમઃ સદાપાતુ નૈઋતે નિર્ઋતિષ્યમામ ॥
19) પશ્ચિમે વરૂણઃ પાતુ, વાયવ્યે વાયુદેવતા ।
ધન દષ્યોત્તરે પાતુ, એશાન્યામીશ્ચડવતુ ॥
20) ઊર્ધ્વ પ્રજાપતિઃ પાયાદધશ્ચાનન્ત દેવતા ।
એવં દશ દિશો રક્ષાં, કુર્વન્ત્વાશાડધિદેવતા ॥
21) ગણેશઃ સર્વદા પાતુ, ક્ષેત્રેશો રક્ષયેત સદા ।
દ્વારશ્રી સર્વદા પાતુ, દેહલી પાતુ સર્વદા ॥
22) ગણનાથઃ સદા પાતુ, દુર્ગામાં પરિરક્ષતુ ।
બટુકો ભૈરવશ્ચાન્તે ક્ષેત્રપાલોભિરક્ષતુ ॥

23) સહ રત્યા સ્વપત્ન્યાય કામદેવસ્ય સર્વદા ।
પ્રિત્યા સહ વસન્તોપિ પાતુમા નન્દને વને ॥
24) ચક્રસ્ય પશ્ચિમદ્વારે ભવાન્યાં રત્નમંન્દિરે ।
શંખ પદમ્ નિધી રક્ષા કુરૂતાં કામ સિદ્ધયે ॥
25) પાતુ મા રત્ન સોપાનં પરમેશ્વર્ય શોભિતમ્ ।
રક્ષયેત પશ્ચિમ દ્વારે ભવાન્યાં રત્નમંન્દિરે ॥
26) સરસ્વતી મહાલક્ષ્મી માયા દુર્ગા વિભૂતયે ।
ભદ્રકાલી તથા સ્વસ્તી સ્વાહા ચૈવ શુભંકરી ॥
27) ગૌરી ચ લોકધારી ચ વાગીશ્વર્યા ધ્યોમર્મ ।
એતાશ્ચાત્ર સ્થિતાઃ સર્વા રક્ષાં કુર્વન્તુ સવદા ॥
28) પાષંડા ચારિણો ભૂતા ભૂમૌ યે ભાન્તરીક્ષગા ।
દિવિલોક સ્થિતા યે ચ તે ગચ્છતુ શિવા જ્ઞયા ॥
29) વાસ્તુનામા ધિપો બ્રહ્મા સ્ત્રષ્ટા રક્ષતુ સર્વદા ।
કુલનાથઃ સદા પાતુ ધ્વીપનાથોપિ સર્વદા ।
શિવં કુર્વન્તુ તાઃ સર્વા આસને પંચદેવતાઃ ॥
30) પૃથ્વી ત્વયા ધૃતાલોકા દેવિત્વં વિષ્ણુના ધૃતા ।
ત્વં ચ ધારય મા દેવી પવિત્રં કુરૂ ચાસનમ્ ॥
31) ચક્રસ્ય દક્ષિણે ભાગે શ્રીમત્ પાત્રસ્ય મંડલે ।
પંચ રત્નનિ મે પાતુ પૂજકાનાં ચ સિદ્ધયે ॥
32) તત્ર પાત્રાસાદને પૂણ્યે સર્વદા વન્હિ મંડલે ।
વન્હેસ્ય મંડલં પાતુ કુદેવ્યાશ્ચ પૂજને ॥
33) ધૂમાર્ચિરૂષ્મા જ્વલિની જ્વાલિની વિસ્ફુલિંગિની ।
સુશ્રીઃ સુરૂપા કપિલા હવ્ય કવ્ય વહે દશ ॥

34) વન્દે દંશ કલા જ્ઞેયાઃ સર્વ ધર્મ ફલ પ્રદાઃ ।
એતાભિઃ સહિતો રક્ષાં કુર્યાદ્વૈશ્વાનરો મમ ॥
35) તત્ર પાત્રવરે દિવ્યે શ્રીમદાદિત્યમંડલે ।
સૂર્યસ્થ મંડલં પાતુ મમ સર્વાર્થા સિદ્ધયે ॥
36) તપિની તાપિની ધૂમ્રા મરીચિ જ્વાલિની રૂચિ ।
સુષ્મના ભોગદા વિશ્વા બોધિની ધારિણી ક્ષમા ॥
37) કભાધર્ણયુતા ભાનોષ્ઠડાન્તા ધ્વાદશેરિતા ।
એતાઃ કલાસ્તુ સૂર્યસ્ય સૂર્યમંડલ સંસ્થિતાઃ ।
એતાભિઃ સહિતો રક્ષામ્ આદિત્યઃ પ્રકરોતુમે ॥
38) તત્ર પાત્રામૃતે દિવ્યે સોમસ્યામૃત મંડલે ।
અમૃતં સર્વદાપાતુ ભૈરવાનંદ હેતુકમ ॥
39) અમૃતા માનદા પૂષા તુષ્ટિઃ પુષ્ટિ રીતર્ધૃતિઃ ।
શશિની ચન્દ્રીકા કાન્તિ જર્યાત્સ્ના શ્રીઃ પ્રીતીરંગદા ॥
40) પૂર્ણા પૂર્ણામૃતા કામદાયિન્યઃ સ્વરજા કલાઃ ।
સોમમંડલ મધ્યસ્થા રક્ષાં કુર્વન્તુ સર્વદા ॥
41) રવિ વેદ કલા પૂર્ણ સુધા સંપૂર્ણ મંડલે ।
નક્ષત્રાધિપતી રક્ષાં કરોતુ મમ ભૂતયે ॥
42) સૂર્યાગ્નિ મંડલે દિવ્ય સંપૂર્ણે શશિ મંડલે ।
પાતુમા ખેચરી બીજં દોષૈકા દશનાશકૃત ॥
43) શક્તિ યુક્તે સુરાનન્દે ભૈરવાદ્યૈઃ સશક્તિભિ ।
આનન્દ ભૈરવો રક્ષાં કરોતુ મમ સર્વદા ॥
44) તત્ર પૂર્ણામૃતે પૂણ્યે શક્તિર્યા વારુણી કલા ।
આનન્દરૂપિણી રક્ષાં કરોતુ મમ સર્વદા ॥

45) સૃષ્ટિર્બુદ્ધિઃ સ્મૃતિર્મેધા કાન્તિર્લક્ષ્મીર્દ્યુતિઃ સ્થિરા ।
સ્થિતિઃ સિદ્ધિરિતિ ખ્યાતાઃકચવર્ગ કલાદશ ॥
46) અકારાત્ બ્રહ્મણોત્પન્નાઃ સૃષ્ટિ કર્મણિ તત્પરાઃ ।
એતાભિઃ સહિતઃ પાયાત્ બ્રહ્મા મા વાક્પદઃ સદા ॥
47) જરા ચ પાલિની શાન્તિરીશ્વરી રતિ કામિકે ।
વરદા હલાદીની પ્રીતી દીર્ઘા ચ ટત વર્ગ ગાઃ ॥
48) ઉકારાત્ વિષ્ણુ સંભુતાઃ સ્થિતિ કર્મણિ તત્પરાઃ ।
એતાભિઃ સહિતઃ પાયન્માં વિષ્ણુઃ પુષ્ટિદાયક ॥
49) તીક્ષ્ણા રૌદ્રી ભયા નિદ્રા તન્દ્રી ક્ષુત્ ક્રોધિની ક્રિયા ।
ઉદ્ગારા મૃત્યુરૂપા ચ પયવર્ગ કલા દશ ॥
50) મકારાત્  રૂદ્ર સંભુતાઃ સંહાર નિરતાઃ સદા ।
એતાભિઃ સહિતો રૂદ્રો માં પાયાન મૃત્યુનાશકઃ ॥
51) તિરસ્કરિણ્યઃ પશુ હત્ પંચેન્દ્રિય વિમોહના ।
અનન્તાન્તાસ્તુ તાઃ પંચ પીતા શ્વેતારૂણા સિતા ॥
52) બિન્દોરીશ્વર સંભૂતાઃ પળ વર્ગ કલાસ્તથા ।
તિરોધાન પરાભિર્મા પાયા દેતા ભિરીશ્વરઃ ॥
53) નિવૃતિષ્ય પ્રતિષ્ઠા ચ વિદ્યા શાન્તિ સ્તથૈવ ચ ।
ઈન્ધિકા દીપિકા ચેતિ રોચિકા મોચિકા પરા ॥
54) સૂક્ષ્મા સૂક્ષ્મા મૃતાક્ષાના મૃતા અપ્યાયિની તથા ।
વ્યાપિની વ્યોમરૂપા ચ અનન્તા ચેતિ ષોડશ ॥
55) એતાઃ સ્વર કલાનાદાત્ સદા શિવ સમુદ્ભવા ॥
56) અનુગ્રહ પ્રદા નિત્યં સર્વસિદ્ધિ પ્રદાયિકા ।
એતાભિઃ સહિતઃ પાયાત્સદા પૂર્વઃ શિવસ્તુમામ્ ॥
57) માતૃકા પાતુમા નિત્યં સર્વમન્ત્ર સ્વરૂપિણી ।

અખન્ડૈક રસાનન્દ, કરી મા પાતુ સર્વદા ॥
58) અમૃતેશી સદા પાતુ દાપિની પાતુ સર્વદા ।
મૂલવિદ્યા ચ માં પાતુ શ્રીમત્ ત્રિપુર સુન્દરી ।
કામેશ્વર્યા દિ ભિર્યુક્તા નિત્યાભિઃ પાતુમા સદા ॥
59) સર્વા ઘોમંડુકાકારે રૂદ્રઃ કાલનલો વિભુઃ ।
60) રક્ષા કરોતુ મે નિત્યં યા મૂલ પ્રકૃતિઃ સદા ।
તતશ્ચા ધાર શક્તિર્યા મમ રક્ષા કરોતુ સા ॥
61) કૂર્મસ્તુ સતતં પાયા દનન્તો રક્ષયેત્સદા ।
તસ્ય મૂર્ધ્નિ સ્થિતઃ શ્વેત વરાહઃ પરિરક્ષતુ ॥
62) દન્તે તસ્ય સ્થિતા પૃથ્વી, પાતુ નિત્યં વસુન્ધરા ।
સમુદ્રઃ સર્વદા પાતુ, સુરત્નૈ રમૃતૈર્જલૈઃ ॥
63) રત્નદીપં ચમે રક્ષાં, કરોતુ સ્વર્ણપર્વતઃ ।
પાતુ મા નન્દનો ધ્યાનં, પાન્તુમાં કલ્પભૂરૂહ ॥
64) અધસ્તેષાં સદા પાતુ, વિચિત્રા રત્નભૂમિકા ।
બાલુકાઃ પચં મા પાન્તુ,પાન્તુ દેવ મહીરૂહઃ ॥
65) નવરત્ન મયા સ્તત્ર, પ્રાકારા પાન્તુ માં નવ ।
શ્રીરત્ન મન્દિરં દિવ્યં, ચિન્તામણિ વિભૂષિતમ્ ॥
66) તત્ર પદ્મે મહાદિવ્યે, પ્રભા મંડલ વેદિકા ।
શ્વેતચ્છત્રં સદા પાતુ, રત્ન મુક્તામણિપ્રભમ્ ॥
67) પ્રભા મધ્ય સ્થિતં પાતુ, રત્ન સિંહાસનં ચ મામ્ ।
સિંહાસનસ્ય પાર્શ્વસ્થં, ધર્મ જ્ઞાનં ચ રક્ષતુ ॥
68) વૈરાગ્યં રક્ષયેનિત્યમ્ ઐશ્વર્ય રક્ષયેત સદા ।
ધર્મો રક્ષયેન્નિત્યમજ્ઞાનં પરિરક્ષતુ ॥

69) અવૈરાગ્યં તુ માં પાયાદનેશ્વર્યં તુ સર્વદા ।
સિંહાસનસ્ય મધ્યસ્થા, દુર્ગા મા પરિરક્ષતુ ॥
70) માયા માં પાતુ તત્રૈવ વિદ્યા માં  પરિરક્ષતુ ।
શ્રી વિદ્યા શુધ્ધ વિદ્યા ચ, માતંગી ભૂવનેશ્વરી ॥
71) વારાહી ચ સમાખ્યાતાઃ પંચ વિદ્યાશ્ચ પાન્તુ મામ્ ।
અનન્તો રક્ષયેન્નિત્યં ફણપચ્ચ્દશાન્વિતઃ ॥
72) તન્મધ્ય ફણમધ્યસ્થં મહાપદ્મં ચ રક્ષતુ ।
પાતુ ચાનન્દ કન્દં માં જ્ઞાનનાલં ચ સર્વદા ॥
73) દલા પ્રકૃતિરૂપા માં, પ્રકૃત્યા કારકેસરૈઃ ।
પાતુ માં પાતુ નિત્યં, સા તત્વરૂપા ચ કર્ણિકા ॥
74) સૂર્યસ્ય મણ્ડલં પાતુ,પાતુ માં સોમમણ્ડલમ્ ।
વહનેષ્ય મણ્ડલં પાતુ, સત્વં રક્ષતુ સર્વદા ।
રજસ્ય પાતુ માં નિત્યં, પાતુ નિત્યં તમોગુણઃ ॥
75) આત્મા ચૈવાન્તરાત્મા ચ પરમાત્મા ચ રક્ષતુ ।
જ્ઞાનાત્મા ચ તથા રક્ષાં, કરોતુ મમ સર્વદા ॥
76) આત્મતત્વં  શક્તિતત્વં  વિદ્યાતત્વં   તથૈવ ચ ।
સદા શિવસ્ય યતત્વં તત્સર્વ પાતુ માં સદા ॥
77) જ્ઞાનં માયા કલાવિદ્યા, તત્વાત્માનો વિભૂતયઃ ।
રત્ન સિંહાસને દેવ્યા, રક્ષં કુર્વન્તુ સર્વદા ॥
78) બ્રહ્મા વિષ્ણુશ્ચ  રૂદ્રશ્ચ ઈશ્વરશ્ચ સદાશિવઃ ।
એતે પચ્ચ મહાપ્રેતા, રક્ષાં કુર્વન્તુ સર્વદા ॥
79) સુધાર્ણ વાસનં પાતુ, પાતુ પોતામ્બુજાસનમ્ ।
દેવ્યાસનં સદા પાતુ, પાતુ ચક્રાસનં ચ મામ્ ॥

80) સર્વ મન્ત્રાસનં પાતુ, સાધ્યસિદ્ધાસનં  તથા    ।
નવ યોન્યાસનં પાતુ, સર્વદા મમ રક્ષણમ્    ॥
81) કરોતુ કુલ સુન્દર્યાઃ,  કામરૂપ શિવાસનમ્    ।
તત્રૈવ સંસ્થિતા દેવ્યો, રક્ષં કુર્વન્તુ સર્વદા    ॥
82) ત્રિપુરા ત્રિપુરેશી ચ, ત્રિપુરાદ્યા ચ સુન્દરી    ।
ત્રિપુરવાસિની પશ્ચાત્ , ત્રિપુરાશ્રીશ્ચ માલિની    ॥
83) સિધ્ધામ્બા ભૈરવીત્યેતા સ્ત્રિપુરાદ્યાશ્ચ પાન્તુમામ્    ।
ગુરૂવો દિવ્યસિદ્ધોઘ માનવૌઘા સ્ત્રિધા સ્થિતાઃ    ॥
84) મુનિવેદ નાગસંખ્યા, રક્ષાં કુર્વન્તુ સર્વદા    ।
સમસ્તપ્રકટા ગુપ્તાવસ્યા ગુપ્તતરાશ્ચ યાઃ    ॥
85) સંપ્રદાયાઃ કુલોતીર્ણા , નિગર્ભાશ્ચ રહસ્યકાઃ    ।
તથૈવાતિ રહસ્યાશ્ચ, પરાપર રહસ્યકાઃ    ॥
86) નવધા પૂજનં તત્ર,યોગિનીનાં વિધીયતે    ।
એતાસ્તુ સતતં રક્ષાં, કુર્વતાં યોગિની ગણા    ॥
87) ત્રૈલોક્ય મોહનં ચક્રં, પ્રથમં પરિરક્ષતુ    ।
અણિમા પશ્ચિમે પાતુ, લધિમા ચોત્તરે તથા    ॥
88) પૂર્વ દ્વારે ચ મહિમા, ઈશિતા પાતુ દક્ષિણે    ।
વશિતા મારૂતે પાતુ, પ્રાકામ્યા ત્વીશકે તથા    ॥
89) ભુક્તિ સિદ્ધિ સ્થતા ગ્નેયામ્ ઈચ્છા રક્ષતુ નૈઋતે    ।
અધઃ પાતુ સદાપાપ્તિઃ , સર્વકામ પ્રદાયિની    ॥
90) સર્વકામા સદા પાતુ, ઉર્ધ્વ ચોર્ધ્વ નિવાસિની    ।
એતાઃ પ્રથમ રેખાયાં સર્વા પ્રકટ પૂરિતાઃ    ॥
91) ભૈરવાશ્ચા સિતાગો યઃ કામરૂપસ્ય પીઠકે    ।
બ્રહ્માણી સહિતઃ પૂર્વે દ્વારે માં પરિરક્ષતુ    ॥

92) મલયે ચાગ્નિદિગ્ભાગે સંસ્થિતો  રૂરૂભૈરવઃ ।
માહેશી સહિતઃ પાતુ કુલાચારસ્ય સિદ્ધયે ॥
93) ચણ્ડઃ કોલગિરૌ રક્ષાં કુમારી સહિતો યમે ।
કરોતુ ભૈરવો નિત્યં,પૂજકાનાં ચ સિદ્ધયે ॥
94) વૈષ્ણવી સહિતઃ ક્રોધઃ કુલાન્તે પીઠરાજકે ।
નૈર્ઋતે સર્વદા પાતુ ભોગ મોક્ષાર્થ સિદ્ધયે ॥
95) ચૌહાર્યે પશ્ચિમે પીઠે વારાહી સહિતઃ સદા ।
ઉન્મત્તભૈરવો રક્ષાં કરોતુ મમ સિદ્ધયે ॥
96) જાલન્ધરે મહાપીઠે કપાલી ભૈરવઃ સદા ।
ઈન્દ્રાણી સહિતો રક્ષાં વાયવ્યે પ્રકરોતુમે ॥
97) ઓડયાણે ચોતરે પીઠે ચામુણ્ડા સહિતઃ સદા ।
ભીષણો ભૈરવઃ પાતુ, સાધકાનાં ચ સિદ્ધયે ॥
98) સંહારશ્ચચંડિકા યુક્તો દેવીકોષ્ટે ચ પીઠકે ।
એશાન્યાં રક્ષયે ન્નિત્યં કુલાચારસ્ય સિદ્ધયે ॥
99) એતે દ્વિતીય રેખાયાં સંસ્થિતાશ્ચતુર શ્રગાઃ ।
સર્વસંક્ષોભિણીઃ મુદ્રા પશ્ચિમે પાતુ સર્વદા ॥
100) દ્રાવિણી ચોત્તરે પાતુ પૂર્વે ચાકર્ષિણી સદા ।
યામ્યે વશ્યા સદા પાતુ ઉન્માદા મારૂતે મદા ॥
101) ઈશે મહાકુંશા પાતુ ત્રિખંડા પાતુ ચાનલે ।
નૈર્ઋતે બીજમુદ્રા ચ, ઉર્ધ્વે રક્ષતુ ખેચરી ॥
102) મહામુદ્રા ત્વધઃ પાતુ, યોગિની યોનિરૂપિણી ।
સુસિદ્ધયો મુદ્રિકાશ્ચ ભૈરવાઃ સહ માતૃભિઃ ॥
103) એતાશ્ચક્ર સ્થિતા નિત્યં સર્વકામ ફલપ્રદા ।
ચતુરસ્ત્રે ત્રિરેખાસુ, રક્ષાં કુર્વન્તુ સર્વદા ॥

104) સર્વાશા પૂરકં ચક્રં, દ્વિતિયં પરિરક્ષતુ ।
કામાકર્ષણરૂપા  ચ, બુદ્ધાકર્ષણરૂપિણી ॥
105) અહંકારા કર્ષણી ચ, શબ્દા કર્ષણરૂપિણી ।
સ્પર્શાકર્ષણ રૂપા ચ, રૂપા કર્ષણરૂપિણી ॥
106) રસાકર્ષણ રૂપા ચ, ગન્ધા કર્ષણરૂપિણી ।
ચિત્તાકર્ષણ રૂપા ચ, ધૈર્યા કર્ષણરૂપિણી ॥
107) સ્મૃત્યાકર્ષણ રૂપા ચ, નામા કર્ષણરૂપિણી ।
બીજાકર્ષણ રૂપા ચ, આત્મા કર્ષણરૂપિણી ॥
108) અમૃતાકર્ષણી દેવી, શરીરાકર્ષણી તથા ।
એતાશ્ચક્ર સ્થિતાં નિત્યં સ્વરાર્ણા ષોડશે દલે ॥
109) સર્વા ભીષ્ટ પ્રદા દેવ્યો,રક્ષાં કુર્વન્તુ સદા ।
સર્વસંક્ષોભણં ચક્રં, તૃતિયં પરિરક્ષતુ ॥
110) અનંગકુસુમા પૂર્વે, દક્ષિણે અનંગમેખલા ।
પશ્ચિમે અનંગમદના, ઉત્તરે મદનાતુરા ॥
111) અનંગરેખા ચાગ્નેયાં, નૈર્ઋતે નંગ વેગિની ।
વાતે અનંગકુશા ચૈવ ઈશે ચાનંગમાલિની ॥
112) કવર્ગાદ્યષ્ટ વર્ગસ્થા અષ્ટૌ ચાનંગ શક્તય ।
રક્ષાં કુર્વન્તુ તાઃ સર્વા, દેવ્યશ્ચષ્ટદલે સ્થિતા ॥
113) સર્વસૌભાગ્યદં  ચક્રં, ચતુર્થ પરિરક્ષતુ ।
સર્વસંક્ષોભણી શક્તિઃ, સર્વવિદ્રાવિણી તથા ॥
114) સર્વાકર્ષણ શક્તિશ્ચ સર્વાહ્લાદ સ્વરૂપિણી ।
સર્વસમ્મોહિની શક્તિઃ, સર્વસ્તમ્ભનરૂપિણી ॥
115) સર્વજૂમ્ભણ શક્તિશ્ચ, સર્વાતો વશ્યરૂપિણી ।
સર્વ રંજન શક્તિશ્ચ, સર્વોન્માદ સ્વરૂપિણી ॥

116) સર્વાર્થસાધિની શક્તિ:, સર્વ સમ્પતિ પૂરણી ।
સર્વ મંત્રમયી શક્તિ:, સર્વ દ્વન્દ્વ ક્ષયંકરી ॥
117) ચતુર્દશાર ચક્રસ્થા, રક્ષાં કુર્વન્તુ સદા ।
સર્વાર્થસાધકં ચક્રં, પંચમં પરિરક્ષતુ ॥
118) સર્વસિદ્ધિપ્રદા દેવી સર્વસંપત્પ્રદાયિની ।
સર્વ પ્રિયંકરી શક્તિ:, સર્વ મંગલકારિણી ॥
119) સર્વકામપ્રદા દેવી સર્વદુ:ખ વિમોચિની ।
સર્વમૃત્યુ પ્રશમની, સર્વવિઘ્ન નિવારિણી ॥
120) સર્વાર્ગ સુંદરી દેવી, સર્વ સર્વસૌભાગ્યદાયિની ।
બર્હિદશાર ચક્રસ્થા, રક્ષાં કુર્વન્તુ સર્વદા ॥
121) સર્વ રક્ષાકરં ચક્રં, ષષ્ઠં રક્ષતુ સર્વદા ।
સર્વજ્ઞા સર્વશક્તિશ્ચ, સર્વેશ્વર્ય ફલપ્રદા ॥
122) સર્વ જ્ઞાનમયી દેવી, સર્વ વ્યાધિવિનાશિની ।
સર્વાધાર સ્વરૂપા ચ, સર્વપાપહરા તથા ॥
123) સર્વાનંદમયી દેવી, સર્વ રક્ષા સ્વરૂપિણી ।
તથૈવ હિ મહાદેવી, સર્વેપ્સિત ફલપ્રદા ॥
124) અન્તર દશાર ચક્રસ્થા, રક્ષાં કુર્વન્તુ સર્વદા ।
સર્વરોગહરં ચક્રં, સપ્તમં પરિરક્ષતુ ॥
125) વાગ્દેવી વશિની પાતુ, પાતુ કામેશ્વરી ચ મામ્ ।
મોદિની વિમલા પાતુ, અરૂણાજયિની ચ મામ્ ॥
126) સર્વેશ્વરી ચ મે રક્ષાં, કુરૂતા કૌલિની તથા ।
વાગ્દેવ્યો વરદા: સન્તુ, સર્વાસ્તુષ્યન્તુ પૂજિતા ॥
127) અર્ષ્ટકોણાન્તરે વાણ્યો, રક્ષાં કુર્વન્તુ સર્વદા ।
સર્વસિદ્ધિપ્રદં ચક્રં, અષ્ટમં પરિરક્ષતુ ॥

128) અષ્ટકોણાન્તર સ્થાને, ત્રિકોણે બહિરાયુધા ।
શ્રીમત્ પાશાંકુશ ધનુર્બાણાશ્ચા યુધદેવતા ॥
129) ષડંગ દેવતાઃ પાન્તુ, અંગસ્થા શ્ચાંગ દેવતા ।
મહાદેવ્યાશ્ચક્ર સંસ્થા, રક્ષાં કુર્વન્તુ સર્વદા ॥
130) શ્રીમત્ ત્રિકોણ મધ્યે તુ, તત્રકોણ ત્રયેષુ ચ ।
મધ્યે ચ સર્વદા પાન્તુ, ચતસ્ત્ર પીઠદેવતા ॥
131) કામે કામેશ્વરી પાતુ, પૂર્ણે વજ્રેશ્વરી તથા ।
જાલન્ધરે મહાપીઠે, પાતુ મા ભગમાલિની ॥
132) ઓડયાણકે મહાપીઠે,મહાત્રિપુરસુંદરી ।
સર્વાનન્દ મયં ચક્રં, નવમં પરિરક્ષતુ ॥
133) સૂર્યેન્દુ વહ્ન પીઠે તુ, બિન્દુ ચક્ર નિવાસિની ।
બ્રહ્મ સ્વરૂપિણી પાતુ, શ્રીમત્  ત્રિપુરસુન્દરી ॥
134) યોનિમધ્યે તુ પરિતો, નિત્યા ષોડશ શક્તય ।
દેવ્યાઃ શ્રીચક્ર મધ્યસ્થા, રક્ષાં કુર્વન્તુ સર્વદા ॥
135) ત્રૈલોક્યમોહને ચક્રે, ચતુરસ્ત્રે સુશોભને ।
પાતુ મામનિશં દેવી, ત્રિપુરા પરમેશ્વરી ॥
136) સર્વાશાપૂરકે ચક્રે, ષોડશારે મનોહરે ।
તત્ર ચક્રેશ્વરી નિત્યં, પાતુ મા ત્રિપુરેશ્વરી ॥
137) તથાષ્ટદલ ચક્રે તુ, સર્વ સંક્ષોભકારકે ।
તત્ર ચક્રેશ્વરી નિત્યં, પાયા ત્રિપુરસુન્દરી ॥
138) ચતુર્દશાર ચક્રે તુ, શુભે  સૌભાગ્યદાયકે ।
તત્ર ચક્રેશ્વરી નિત્યં, પાયા ત્રિપુરવાસિની ॥
139) સર્વાર્થસાધકે બાહ્યે દશારે ચક્રરાજકે ।
ત્રિપુરાશ્રીઃ સદાપાતુ, મમ કલ્યાણહેતવે ॥

140) અન્તર્દશાર ચક્રે તુ,સર્વ રક્ષા કરે પરે ।
નિત્યં ચક્રેશ્વરી દેવી, પાયાત્ ત્રિપુરમાલિની ॥
141) અથાષ્ટકોણ ચક્રે તુ,સર્વ રોગ હરે પરે ।
પાતુમાં ત્રિપુરા સિદ્ધા, દેવી ચક્રેશ્વરી સદા ॥
142) સર્વ સિદ્ધપદે ચક્રે, ગુણકોણે મનોહરે ।
ચક્રેશ્વરી ચ મે રક્ષાં, કરોતુ ત્રિપુરામ્બિકા ॥
143) સર્વાનન્દમયે ચક્રે, મધ્યે બિન્દૌ સુશોભને ।
મહા ચક્રેશ્વરી પાતુ, શ્રીમત્  ત્રિપુરભૈરવી ॥
144) નિત્યા કામેશ્વરી પાતુ, પાતુ માં ભગમાલિની ।
નિત્ય ક્લિન્ના ચ માં પાતુ,ભેરૂંડા પાતુ સર્વદા ॥
145) માં વહ્નવાસિની પાતુ, મહાવજ્રેશ્વરી તથા ।
પાતુમાં શિવદૂતિ ચ ત્વરિતા રક્ષયેત્ સદા ॥
146) કુલસુંદરી માં પાતુ, નિત્યા નિત્યા ચ પાતુ મામ્ ।
નિત્યા નીલપતાકા ચ, વિજયા પાતુ સર્વદા ॥
147) શ્રી સર્વમંગલા પાતુ, નિત્યા જ્વાલાંશુમાલિની ।
વિચિત્રા સર્વદા પાતુ,ષોડશી પાતુ સુન્દરી ॥
148) ષોડશી પ્રથમા નિત્યા ત્રિપંચ્ચ તિથિગામિની ।
અનુલોમ વિલોમેન, શ્રીમત્  ત્રિપુરસુન્દરી ॥
149) મહાવિદ્યા તુરીયા તુ, પાતુ માં બહુરૂપિણી ।
મહાસપ્તદશી નિત્યા, નિત્ય માનન્દરૂપિણી ॥
150) પૂર્વદક્ષિણપશ્ચાચ્ચ, ઉત્તરોર્ધ્વ મનુત્તમમ્ ।
બૌદ્ધ વેદિક શૈવાશ્ચ, સૌર વૈષ્ણવ શાક્તકાઃ ॥
151) સૃષ્ટિ સ્થિતિ લયાખ્યાનાં, વાસો રક્ષતુ સર્વદા ।
ચતસ્ત્રઃ સમયા દેવ્યો, યોગિન્ય પાન્તુ સર્વદા ॥

152) ચતુરસ્ત્રે મહાચક્રે તારા માં પરિરક્ષતુ ।
ડાકીની રાકિની પાતુ, કાલિની કાકિની તથા ।
સાકિની હાકિની પાતુ યાકિની સર્વરૂપિણી ॥
153) વર્ણસ્થા માતૃકાઃ સર્વા દેહસ્થા માતૃકાશ્ચ યાઃ ।
રક્ષાં કુર્વન્તુ તાઃ સર્વાશ્ચક્રરાજે તુ પૂજિતા ॥
154) શ્રી ચક્રે પૂજિતાઃ યા યાઃ પૂજિતા યે ન પૂજિતા ।
સર્વાસ્તાઃ પૂજિતાઃ સન્તુ, શ્રીમત્ ત્રિપુરસુન્દરી ॥
155) ચતુરસ્ત્રૈ મહાચક્રે, બુદ્ધો માં પરિરક્ષતુ ।
પાતુ મામનિશં દેવઃ, ષોડશારે પ્રજાપતિઃ ॥
156) તથાષ્ટ દલચક્રે તુ, શિવો માં પરિરક્ષતુ ।
ચતુર્દશાર ચક્રેતુ ભાસ્કરો રક્ષયેત્ સદા ॥
157) દ્વિદશારે તથા પાતુ, પ્રભુ નારાયણો હરિઃ ।
અષ્ટારે મધ્યચક્રે તુ, પાતુ માં ભુવનેશ્વરી ॥
158) અષ્ટરાન્ત ત્રિકોણે તુ, કાલિકા પાતુ સર્વદા ।
ત્રિકોણાન્તર ચક્રે તુ, પાતુ કાત્યાયની ચ મામ્ ॥
159) નવ ચક્રેશ્વરી નિત્યા, યા નિત્યા પરમા કલા ।
પાતુ મામનિશં દેવી, શ્રીમત્ ત્રિપુરસુન્દરી ॥
160) મહાત્રિપુર સુન્દર્યા ચિન્તનીયા ચ યા પરા ।
બ્રહ્મ સ્વરૂપિણી પાતુ, પચ્ચમી પરદેવતા ॥
161) પંચમી પાતુ સતતં નિત્યં રક્ષતુ પચ્ચમી ।
શાન્તિં કરોતુ સા નિત્યા, પંચમી પરદેવતા ॥
162) સા પુનઃ પચ્ચમી શક્ત ર્નિત્ય ચૈતન્ય રૂપિણી ।
કારણાનન્દ મધ્યસ્થા પાતુમાં પંચમી સદા ॥

163) પંચ તત્વં તથા પંચ,યત્  કિંચ્ચિત્ પંચમં સ્મૃતમ્ ।
નિત્યં પંચગુણેઃ પાતુ પંચમી પરદેવતા ॥
164) પંચ પંચાક્ષરૈ ર્મન્ત્રેઃ પંચ કૂટૈશ્ચ પંચભિઃ ।
પંચમી પાતુ સતતં, નિત્યં રક્ષતુ પંચમી ॥
165) શ્રીવિદ્યા ચ તથા લક્ષ્મી ર્મહાલક્ષ્મી સ્તથૈવ ચ ।
ત્રિશક્તિઃ સર્વ સામ્રાજ્ય લક્ષ્મીઃ પંચ પ્રકીર્તિતાઃ ॥
166) શ્રીવિદ્યા ચ પરંજ્યોતિઃ પરાનિષ્કલ શામ્ભવી ।
અજપા માતૃકા ચેતિ, પંચકોશાઃ પ્રકીર્તિતાઃ ॥
167) શ્રીવિદ્યા ત્વરિતા ચૈવ પારિજાતેશ્વરી તથા ।
ત્રિપુટા પંચ બાણેશી, પંચ કલ્પલતાઃ સ્મૃતાઃ ॥
168) શ્રીવિદ્યા મૃત પીઠેશી, સુધાસૂર મૃતેશ્વરી ।
અન્નપૂર્ણેતિ વિખ્યાતાઃ, પંચ કામદુધાઃ સ્મૃતાઃ ॥
169) શ્રીવિદ્યા સિદ્ધલક્ષ્મીશ્ચ, માતંગી ભુવનેશ્વરી ।
વારાહી પંચરત્નાનામ્ ઈશ્વરશ્ચ  પ્રકીર્તિતાઃ ॥
170) ગણેશો બટુકશ્ચૈવ, ક્ષેત્રેશો યોગિનીગણા ।
તર્પિતા બલિપાત્રાણિ સર્વે રક્ષન્તુ પૂજિતા ॥
171) એશાન્યાં સર્વદા પાતુ, નિત્યં નિર્માલ્યવાસિની ।
શેષિકા સુન્દરી પાતુ, બિન્દુ ચક્રનિવાસિની ॥
172) નિત્યં કામકલા પાતુ,મુદ્રા માં પાતુ ખેચરી ।
શક્તિર્મા સર્વદા પાતુ, યા મુલાધાર વાસિની ॥
173) મુદ્રા મન્ત્રોપચારેસ્તુ, સમસ્તા દેવતાશ્ચ યાઃ ।
તાઃ શ્રીશ્ચ પૂજિતા ચાસ્તુ, શ્રીમત્  ત્રિપુરસુન્દરી ॥

## ।।ફલશ્રુતિ।।

174) શ્રીમત્  ત્રિપુરસુન્દર્યાઃ, સ્તવરાજ મનોહરમ્ ।
પૂજાક્રમેણ કથિતં, સાધકાનાં સુખાવહમ્ ।।
175) ક્રમેણાનેન વિધિના, શ્રીમત્  ત્રિપુરસુન્દરીમ્ ।
સંપૂજ્ય સાધક શ્રેષ્ઠો, રક્ષા મન્ત્રં સદા પઠેત્ ।।
176) પ્રાતઃકાલે શુચિર્ભુત્વા, નિશાયા મર્ધરાત્રકે ।
અથવા સંકટે પ્રાપ્તે, રાજસ્થાને દુર્ગમે ।।
177) જલે વા થ સ્થલે વાપિ, સ્મશાને દુર્ગમે ગિરૌ ।
યત્ર યત્ર ભયે પ્રાપ્તે, સ તત્રૈવ પઠેન્નર ।।
178) સર્વાવયવભાવેન, દેવીં સંચિંત્ય સાધકઃ ।
રક્ષા કુર્વીત યત્નેન, યદી ચ્છેદાત્મનો હિતમ્ ।।
179) સ્ત્રોત્રં ચાદ્ભૂતમેવેદં, ત્રૈલોક્યૈ ચાપિ દુર્લભમ્ ।
ગોપનીયં પ્રયત્નેન, યદી ચ્છેદાત્મનો હિતમ્ ।।
180) યસ્મૈ કસ્મૈ ન દાતવ્યં, ન વક્તવ્યં કદાચન ।
શિષ્યાય ભક્તિયુક્તાય, સાધકાય પ્રકાશયેત્ ।।
181) ભ્રષ્ટેભ્યઃ સાધકેભ્યોપિ , બાન્ધવેભ્યો ન દર્શયેત્ ।
દત્તે ચ સિદ્ધિહાનિઃ સ્યાદિત્યાજ્ઞા શાંકરી કૃતા ।।
182) મન્ત્રાઃ પરાઙમુખા યાન્તિ કુદ્ધા ભવતી સુન્દરી ।
અશુભં ચ ભવેત્ તસ્ય તસ્માદ્ યત્નેન ગોપયેત્ ।।
183) યદ્ગૃહે વિદ્યતે સ્ત્રોત્રં ગ્રન્થે લિખિત મુત્તમમ્ ।
ચંચલાપિ સ્થિરા ભૂત્વા કમલા તત્ર તિષ્ઠતિ ।।
184) તસ્માદ્યત્નાદિમં ગ્રન્થં પૂજયેત્ ગન્ધ પુષ્પકૈ ।
પૂજાફલં લભેન્નિત્યં સુન્દરી સંનિદિર્ભવેત ।।

185) સ્તવરાજમિમં પુણ્યં યઃ પઠેત્ સુસમાહિતઃ ।
યત્ફલમ્ લભતે તસ્માચ્છૃણુદવં સાધકોત્તમાઃ ॥
186) વારમેકં તુ યોધીયાત્ સ પૂજાફલ મશ્નુતે ।
વેદિતા માતૃ ચક્રસ્ય સાધકો ભુવિ જાયતે ॥
187) માસમેતત્ ક્રમણૈવ, પઠેત ભક્તિ પરાયણઃ ।
સ્વર્ગેપિ વિદિતો ભૂત્વા,દેવી ભક્તસ્તુ ભૂતલે ॥
188) ભક્ત્યા ચ ધારયેધ્યસ્તુ, લિખિત્વા સ્ત્રોત્ર મુત્તમમ્ ।
શિખાયા મથવા કણ્ઠે,બાહૌ વા ભક્તિસંયુતઃ ॥
189) સભવેત સાધક શ્રેષ્ઠો, માતૃણાં ચ સદા પ્રિય ।
લભતે સર્વ કામાન્વૈ, પરં સ્વ સ્ત્યયનં ભવેત ॥
190) તસ્માદિદં પ્રયત્ને, ધારયેત્ વિધિના તથા ।
પઠિત્વા પૂજયિત્વાચ, ત્રૈલોક્યં વશમાનયેત્ ॥
191) ભક્તાય દદતે તસ્મૈ, મન્ત્રં રક્ષાકરં પરમ્ ।
ધૃત્વા સૌવર્ણ મધ્યસ્થાં સર્વકામન્ નરો લભેત્ ॥
192) યાનિ વાંચ્છતિ કામાનિ, ભુક્તિ મુક્તિ કરાણિ ચ ।
લભતે નાત્ર સન્દેહો, ભુવિ સ્વર્ગે રસાતલે ॥
193) દ્રષ્ટવા ચ સાધકશ્રેષ્ટં,ગ્રહરાક્ષસ હિંસકાઃ ।
દૂરાદેવ પલાયન્તે ન સમર્થશ્ચ હિંસિતુમ ॥
194) વિષં નિર્વિષતાં યાતિ, પાપં નિર્યાતિ સંક્ષયમ્ ।
દેવવન્માનવો ભૂત્વા, ભુનક્તિ બહુલં સુખમ્ ॥
195) તસ્માન્નિત્યં પઠેદ્ધિમાન્, મુક્તિ કામાર્થ સિદ્ધયે ।
ભક્તયા ચ ધારયે દેવીં, સ્વરક્ષા સર્વદા ચરેત્ ॥
196) પૂર્વજાતિ પરિજ્ઞાન વેદ્યં જન્મ સહસ્ત્રકમ્ ।
ન પુનર્જાયેત યોનૌ, મરણં નાસ્તિ ચાપરમ્ ॥

197) ગન્ધર્વ રૂપવાન્ ભૂત્વા, સંપૂજ્યં પરમેશ્વરીમ્ ।
રક્ષામન્ત્રં પઠિત્વા ચ, દેવત્વં લભતે ધ્રુવમ્ ॥
198) અપુત્રો લભતે પુત્રં, દરિદ્રો લભતે ધનમ્ ।
યં યં વાપિ સ્મરેન્નિત્યં, તં તમાપ્નોતિ નિશ્ચિતમ્ ॥
199) અતિ દઃખાલયે કષ્ટે, ભીમે નિગળ બન્ધને ।
સકૃત્પાઠે કૃતે નિત્યં, નિગળાન્મુચ્યતે ધ્રુવમ્ ॥
200) દુષ્કૃ તૈરભિચાચારૈશ્ચ રોગૈર્યક્ષ્માદિભિશ્ચ યઃ ।
પર પ્રયુક્તે ગ્રસ્તોપિ પઠનાન્મુચ્યતે નરઃ ॥
201) ઈમં ત્રિપુર સુન્દર્યાઃ, સ્તવરાજં મનોહરમ્ ।
રક્ષા મન્ત્રં ચ શુભદં, શિવેન પરિકીર્તિતમ્ ।
યઃ પઠેત પ્રયતો ભક્તયા, સધ્યો રોગાત્સ મુચ્યતે ॥
202) આયુરારોગ્યમૈશ્વર્ય, ભુક્તિં મુક્તિં ચ વિદન્તિ ।
સર્વાન કામાનવાપ્નોતિ, દેવેન્દ્રસ્યાપિ દુર્લભાન્ ॥

॥ ઈત શ્રી રૂદ્રયામળ ત્રિપુરાસ્તવરાજઃ સમાપ્તઃ ॥